# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.-3.5.9** समयः – ११ तः ०२ पर्यन्तम्

दिनाङ्कः – २९/११/२०१६ सन्दर्भग्रन्थः – सिद्धान्तलक्षणम्

---

विभागः-१

प्रश्नः-१ द्वयोः व्याख्यां विशदतया साधयत। (०८)

(१) सिद्धान्तलक्षणग्रन्थारम्भसङ्गतिं यथामति विवृणुत।

(२) मणिलक्षणं यद्रूपेति परिष्कारे बीजं किम् ? विवृणुत।

(३) ‘साधनस्य विशिष्टसत्त्वादेर्गुणादाववृत्तेः’ विशदयत।

प्रश्नः-२ द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) नञ् व्यत्यासपक्षं शङ्कां समाधानपूर्वकं स्पष्टं व्याख्यात।

(२) यद्रूपविशिष्टेति लक्षणं दलसार्थक्यसहितं विवृणुत।

प्रश्नः-३ द्वयोः एकस्य टिप्पणी देया। (०२)

(१) सामानाधिकरण्यम्।

(२) असामानाधिकरण्यम्।

प्रश्नः-४ द्वयोः एकस्य टिप्पणी देया। (०२)

(१) साध्यतावच्छेदकम्।

(२) यत्पदसार्थक्यम्।

विभागः-२

प्रश्नः-५ द्वयोः व्याख्या विशदतया साधयत। (०८)

(१) प्रतियोग्यसामानाधिकरण्यं विवृणुत।

(२) प्रतियोगितावच्छेदकेत्यनुक्त्वा प्रतियोगितानवच्छेदको यो धर्मः इति कथने दीधितेः मतिं प्रयोजनं च प्रतिपादयत।

(३) तद्दण्डी नास्तीत्यादौ अन्ये तु मताकाराणां परिष्कारं परिचाययत।

प्रश्नः-६ द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववानिति दीधितिं व्याख्यात।

(२) ‘एकावच्छेदेन यावद्विशेषाभाववत्त्वस्योपाधित्वाच्च’ विवृणुत।

प्रश्नः-७ एकस्य सन्दर्भसहितव्याख्या कार्या। (०४)

(१) 'व्यर्थविशेषणत्वादप्रयोजकत्वान्निर्गुणत्वादेरुपाधित्वाच्च' व्याख्यात।

(२) 'सामानाधिकरण्यव्यक्तीनां भेदेऽपि व्याप्त्यैक्यम्' विशदयत।

प्रश्नः-८ पञ्चानामेकैकवाक्येनोत्तरत। (०५)

(१) एतेनाऽलमित्यनेन किं परास्तम्?

(२) वस्तुतस्तुकारमते उपाधिः कः?

(३) गदाधरी किं वर्तते?

(४) असमानाधिकरणान्तम् कुतः?

(५) अवच्छेदकभेदेन कस्य भेदः आवश्यकः?

(६) लक्षणे प्रथमयत्पदेन किं ग्राह्यम्?

(७) संयोगसामन्यस्यावच्छेदकं कस्य सुवचत्वमिति सम्प्रदायविदः?

## विभागः-३

प्रश्नः-९ द्वयोः व्याख्या विशदतया साधयत। (०८)

(१) 'साध्यादिभेदेन व्याप्तेर्भेदात्' विवृणुत।

(२) 'तत्तत्साध्यकाव्याप्तिवारणाय तदुपादानम्' व्याख्यात।

(३) 'संयोगाभाववान् यावद्विशेषाभावादिति परास्तमि'ति दीधितिं व्याख्यात

प्रश्नः-१० द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) अत्यन्तपदसार्थक्यं सम्प्रदायवाद्यनुसारं स्पष्टं व्याख्यात।

(२) 'वृत्तेरव्याप्यवृत्तित्त्वे वृत्तिमतो व्याप्यवृत्तित्वस्यात्यन्तमसम्भवात्' इति दीधितिं व्याख्यात ।

प्रश्नः-११ द्वयोः टिप्पणीं ददातु। (०४)

(१) उभयत्वम्।

(२) भूतत्व-मूर्तत्वोभयवान् मूर्तत्वादित्यत्र अतिप्रसङ्गवारणं कुरुत।

(३) 'गुणकर्मण्यत्वे सति सत्तावान् जातेः' इत्यत्र समन्वयं दर्शयत।

प्रश्नः-१२ पञ्चानामेकैकवाक्येनोत्तरत। (०५)

(१) मणेः सिद्धान्तलक्षणं किम्?

(२) रघुनाथशिरोमणिः कः?

(३) दण्ड्यादौ साध्ये साध्यतावच्छेदकं किम्?

(४) तदवच्छिन्नाभावः --------- कुतः?

(५) सामानाधिकरण्यव्यक्तीनां भेदेऽपि कयोरैक्यम्?

(६) गदाधरी कस्य व्याख्या?

(७) मणिकारस्य नाम किम्?

★★★

समाधानानि

कक्षा – शास्त्रितृतीयवर्षम् (SEM-3) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.-3.5.9** समयः – ११ तः ०२ पर्यन्तम्

दिनाङ्कः – २९/११/२०१६ सन्दर्भग्रन्थः – सिद्धान्तलक्षणम्

प्रश्नः - ८

१. संयोगाभाववान् यावद्विशेषाभावादिति।

२. अनवच्छिन्नयावद्विशेषाभाववत्त्वम्।

३. व्याख्याग्रन्थः।

४. कपिसंयोग्येतद्वृक्षत्वादित्यादिसङ्ग्रहाय।

५. संयोगभेदः।

६. हेतुः।

७. द्रव्यत्वादिकमित्यस्यापि इति।

प्रश्नः - १२

१. प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः।

२. दीधितिकारः।

३. परम्परासम्बद्धदण्डत्वादिकमेव।

४. तदवच्छिन्नाभावात्।

५. निरूपकतावच्छेदकस्याधिकरणतावच्छेदकस्य चैक्याद्व्याप्त्यैक्यम्।

६. दीधितेः,गदाधरस्य।

७. गङ्गेशोपाध्यायः।